Model Question Paper

# Sanskrit - Entire (Second or Third Language)

## Std. X

## संस्कृत – मन्दाकिनी

### संस्कृत (संपूर्ण) (New Course - 2013-14)

**Time : 3 hrs.** **Max. Marks : 80**

---

**Q.1 A) Translate into English any three of the following passages : 15**

**खालीलपैकी कोणत्याही तीन उताऱ्यांचे मराठीत भाषांतर करा.**

1) अनिच्छयैव अन्येद्युः सोमशर्मा अनन्तभट्टं प्रति पद्भ्यामेव गतवान् । बालसूर्यस्य किरणेषु पद्भ्यां चलनेन प्रसन्नः सोमशर्मा, "कृपया, भवान् सत्वरमुपचारं करोतु । शीघ्रं गन्तव्यं मया," इत्यवदत् । अनन्तभट्टोऽभाषत, "भोः, भवान् प्रतिदिनं प्रभाते करणीयानि कार्याणि समाप्य उद्यानस्य निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु ।" अनन्तभट्टस्यादेशेन उद्विग्नः सोमशर्मा तत्स्थानं गत्वा स्नानं कृतवान् । शुचिर्भूतः सोमशर्मा अनन्तभट्टस्य गृहं प्रत्यागतवान्। ततस्तस्य वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा सन्तुष्टोऽभवत् ।

2) ग्रामेऽस्मिन् पाण्डुरङ्गकरमरकरनाम्नः कृषीवलस्य सङ्गीत-चित्र-कलादिभिः परिपूर्णं, शान्तिसुखयोः निधानमिव गृहमासीत् । तत्र एकनवाष्टैकतमे ख्रिस्ताब्दे (१८९१) ऑक्टोबरमासस्य द्वितीये दिने पुत्रजन्मोत्सवः संपन्नः जातः । एष विनायकः नाम बालः बाल्य एव पित्रा सह मृत्प्रतिमाः निर्मातुं प्रारभत । विविधप्राणिनां देवतानां च प्रतिमानिर्माणे तस्यासीद् रुचिः । पुस्तकस्थानां विविधचित्राणां पुनर्विलेखनेऽपि स मग्न आसीत् । सततं निरीक्षमाणेन तस्य पित्राऽपि तस्मिन् समुचितसंस्काराः समारोपिताः ।

3) तित्तिरसदृशाः तृणपक्षिणः क्रीडन्तः दृश्यन्ते । वृक्षेषु चित्रबलाकानां कुलानि कलकलं कुर्वन्ति पर्यटकानां चेतांसि हरन्ति । विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति । जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते । श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते । अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति । सैबेरियादेशात् आगच्छन्तः अत्र शीततौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि । लद्दाखप्रान्तादपि नैके खगा आगत्य अत्र हिमसमये वसन्ति । एतान् स्थलान्तरितान् खगान् द्रष्टुं तेषां विषये चाधिकं ज्ञातुं पर्यटकाः अभ्यासकाश्च बहुसंख्ययात्र आगच्छन्ति देशविदेशेभ्यः ।

4) अदितिः – के नाम रसाः भावाश्च ? नाट्येषु रसाभिव्यक्तिः कथं संभवति ?

आचार्या – भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं

भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति । तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः ।

अदितिः – कति रसाः ? कानि च तेषां नामानि ?

आचार्या – शृङ्गारहास्यरौद्रकरुणवीराद्भुतबीभत्सभयानकाः तथैव शान्त इति नवरसाः ख्याताः । अस्मिन् शास्त्रे सर्वरसानां देवताः वर्णाश्च वर्णिताः ।

5) प्राचीनैषा कथा वस्तुवस्तुनः उपयोगः कथं करणीयः इति कथयति नः । क्षुद्रवस्तुनः निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमाणामावश्यकता विद्यते । चित्ताकर्षकं वस्तु क्रीत्वा पश्चाद् यदि न रोचते तर्हि सहजतया वयं बहिः त्यजामः । येनकेनापि रूपेण वस्तुनः उपयोगः भवत्येव इति मनसि कर्तव्यम् । उपभुज्य त्यजत इति विचारं दूरीकृत्य विविधप्रकारैः पुनःपुनः उपयोगं कुरुत । मा कुरुत अनावश्यकक्रयणमिति भारतीया विचारसरणिः अनुकरणीया । स्मर्तव्यमिदं सर्वदा अमूल्यं विद्यते सर्वम् ।

**B) Translate into English any two of the following poetry passages. 8**

**पुढीलपैकी कोणत्याही दोन पद्य समूहांचे भाषांतर करा.**

i) नृपाणां च नराणां च केवलं तुल्यमूर्तिता ।
अधिक्यं तु क्षमा धैर्यमाज्ञादानं पराक्रमः ।।

रक्ष पात्रगतं स्नेहं प्रदीप श्रीविवर्धनम् ।
प्रयास्यन्ति विना तेन भस्मत्वं हि भवद्गुणाः ।।

ii) तत्राश्रितोग्रतपसस्तस्य तं वीक्ष्य विस्मितः ।
वारयिष्यन् द्विजच्छद्मा शक्रो निकटमाययौ ।।

यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ।।

iii) त्रयोऽपि वर्णाः प्रदत्ताश्च यैर्ध्वजाय चास्माकम्
जयतु जवानो, जयतु किसानो, जयतु च विज्ञानम् ।

नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम्
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ।।

v) धृतिः क्षमा दया शौचं, कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ।।

अव्यक्तं व्यापकं नित्यं गुणातीतं चिदात्मकम् ।
व्यक्तस्य कारणं वन्दे व्यक्ताव्यक्तं तमीश्वरम् ।।

**Q.2 A) Answer any two questions from each group in English. 8**

**पुढीलपैकी 'गट १' आणि 'गट २' मधील प्रत्येकी कोणत्याही दोन प्रश्नांची उत्तरे लिहा.**

**Group I**

1) Give some information about wind-energy.
पवन-ऊर्जेविषयी माहिती सांगा.

2) Why Lerasiya did not go elsewhere leaving the two brothers ?
दोघा भावांना सोडून लेरसिया इतरत्र का गेला नाही ?

3) Why is internet compared with Kalpvruksha ?
इंटरनेटला 'कल्पवृक्ष' ही उपमा का दिली आहे ?

**Group II**

1) What was the condition of young Tapodatta who did not study in his childhood ?
लहानपणी अध्ययन न केलेल्या तपोदत्ताची तरुणपणी कशी स्थिती झाली ?

2) According to the lesson 'Namami Rashtradhwajam' what does the white colour suggest ?
'नमामि राष्ट्रध्वजम्' या पाठानुसार राष्ट्रध्वजातील पांढरा रंग आपल्याला काय सुचवतो ?

3) State the Faruki family.
फारुकी वंश सांगा.

**B) Complete any two verses from the following 4**

**पुढीलपैकी कोणतीही दोन सुभाषिते शुद्ध व पूर्ण करून लिहा.**

१. यस्य न ............ बृहस्पतिः ।।
२. रागे द्वेषे ........... प्रशस्यते ।।
३. दुःखिताः ............. सुकृतपादपाः ।।
४. अङ्गेन .............. विना निशा ।।

**C) Write correctly any verse based on either of the following meters : 2**

आपण अभ्यासलेल्या श्लोकांपैकी कोणत्याही एका वृत्तावर आधारित श्लोक शुद्ध व पूर्ण लिहा.

१) इन्द्रवज्रा  २) गीति

**Q.3 Write 5 Sanskrit sentences on any one of the following topics :** **5**

**खालीलपैकी कोणत्याही एका विषयावर संस्कृतमध्ये पाच वाक्ये लिहा :**

१) गणतन्त्रदिनम् २) वृत्तपत्रम् ३) कृषीवल:

***OR***

**Translate any five of the following sentences into Sanskrit :**

**खालीलपैकी कोणत्याही पाच वाक्यांचे संस्कृतमध्ये भाषांतर करा.**

1) Rainbow is seen in the sky in the monsoon.
पावसाळ्यात आकाशात इंद्रधनुष्य दिसते.

2) The Himalaya is the tallest among all mountains.
हिमालय सर्व पर्वतांमध्ये सर्वात उंच पर्वत आहे.

3) Laziness is the greatest enemy of man.
आळस हा माणसाचा मोठा शत्रू आहे.

4) Now railway reservation has become easy.
आता रेल्वेचे आरक्षण करणे सोपे झाले आहे.

5) Tell the story of brave Lion.
शूर सिंहाची गोष्ट सांग.

6) His acting appears artifical.
त्याचा अभिनय कृत्रिम वाटतो.

7) Tell me your sister's name.
तुझ्या बहिणीचे नाव सांग.

8) Have you read that news ?
तू ती बातमी वाचलीस का ?

**Q.4 Rewrite the following Sanskrit Sentences in their chronological order :** **5**

**खालील संस्कृत वाक्यांची घटनाक्रमांनुसार फेरमांडणी करा :**

1) स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत ।

2) सा अश्वयानागमन विषये न जानाति ।

3) दुर्गापूजामहोत्सवं नाम शक्तिपूजनमिति स जानाति स्म ।

4) सहसा तेन दृष्टं यत् काचन् बालिका मार्गे खेलने मग्नास्ति ।

5) तस्या: मात्रा अश्रुपूर्णनयनाभ्यां तस्मै आशीर्वचनं दत्तम् ।

*OR*

**Answer any five of the following questions in Sanskrit :**

**खालीलपैकी कोणत्याही पाच प्रश्नांची उत्तरे संस्कृतमधून लिहा :**

1) सोमशर्मा कुत्र निवसति स्म ?

2) औष्णिक्यूर्जाया: प्रकल्प: कुत्र वर्तते ?

3) कोलकत्तानगरे प्रदर्शनार्थं निर्मितस्य शिल्पस्य नाम किम् ?

4) लेरसिया सहकारिभि: सह कुत्र गत: ?

5) धनेशा: कुत्र वसन्ति ?

6) क: साक्षरोऽपि निरक्षर: आधुनिककाले ?

7) याचकेन क: उपदेश: कृत: ?

**Q.5 A) Translate into English any one of the following passage :** **5**

**खालीलपैकी कोणत्याही एका उताऱ्याचे मराठीत भाषांतर करा :**

i) निदाघसमये मध्याह्ने एक: पथिक: मार्गेण गच्छति स्म । मार्गम् उभयत: आम्रवृक्षा: सन्ति । तत्र स खगानां कलरवं श्रृणोति । वृक्षच्छायायाम् उपविश्य श्रान्त: स आम्रफलानि भक्षयति। संतुष्ट: भूत्वा स वृक्षान् प्रशंसति, 'धन्या: ते महीरूहा: छायापत्रसमन्विता: येभ्य: निराशा: न यान्ति पान्थस्था:'। पथिक: मनसि सङ्कल्पं करोति, 'अहमपि स्वगृहे वृक्षान् आरोपयिष्यामि।'

2) एकदा कश्चित् नर: मृगयार्थम् अगच्छत् । स: सर्वदिनं वने अभ्रमत्, किन्तु कमपि पशुं नापश्यत् । सायंकाले यदा स्वगृहं प्रति आगच्छति स्म, तदा स: एकां पुत्रसहितां हरिणीमपश्यत्। स: नर: अश्वेन तस्या: अनुसरणमकरोत् । किन्तु सा मृगी कुत्रचित् अदृश्या अभवत् । तत: स तस्या: शावकं गृहीत्वा अश्वस्य पृष्ठे बद्धवान् । अश्वमारूह्य स: नर: किञ्चिद् दूरं गत्वा अपश्यद् यत् पुत्रस्नेहव्याकुला सा मृगी अपि पुत्रमनुसरति स्म । स: अचिन्तयत् – एषा हरिणी स्वप्राणमोहं त्यक्त्वा पुत्रं रक्षितुमिच्छति । अहो ! एतां निराशां न करिष्यामि इति विचार्य स: मृगीशावकम् अमुञ्चत्। हरिणी प्रसन्ना अभवत् ।

3) भीम: – आर्य, मुञ्चतु मां क्षणमेकं भवान् ।

युधिष्ठिर: – किमपरमवशिष्टम् ?

भीम: – आर्य, सुमहदवशिष्टम् । संयच्छामि तावदनेन दुर्योधनदु:शासनरुधिरोक्षितेन पाणिना पाञ्चाल्या दु:शासनावकृष्टं केशहरतम् ।

युधिष्ठिर: – सत्वरं गच्छतु भवान् । अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम् ।

भीम : – भवति पाञ्चालराजकन्ये दिष्ट्या वर्धसे रिपुकुलक्षयेण ।

**B) Translate into English any one of the following groups of verses :** **4**

I) a) हीनसेवा न कर्तव्या कर्तव्य: महदाश्रय: ।
रामामासाद्य लङ्कायां लेभे राज्यं विभीषण: ।।

b) अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रम् अमित्रस्य कुत: सुखम् ।।

II a) पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्त्वमचापल्यं प्रत्यक्षेणावगम्यते ।।

b) धनहीनोऽपि शीलाढ्य पूज्य: सर्वत्र विद्यते ।
शीलहीनो धनाढ्योऽपि न पूज्य: स्वजनेष्वपि ।।

III एकोऽपि रोपितो वृक्ष: पुत्रकार्यकरो भवेत् ।
देवान्प्रसूनै: प्रीणाति छायया चातिथिं तथा ।।
फलैर्मनुष्यान्प्रीणाति नारक्यं नास्ति पादपे ।
अपि पुष्पफलैर्हीने द्रुमे पान्थस्य विश्रम: ।।

**Q.6 Answer any two of the following questions in English :** **4**

**स्थूल/पुरवणीवाचन पाठावर आधारित कोणत्याही दोन प्रश्नांची उत्तरे लिहा.**

i) Describe about a book 'विष्णुधर्मोत्तरपुराण'
'विष्णुधर्मोत्तरपुराण' पुस्तकाविषयी माहिती लिहा.

ii) Explain the factors that are responsible to make the picture beautiful ?
चित्राचे सौंदर्य कोणत्या गोष्टींनी वाढते ?

iii) Why does Sankrit language deserves to be our national language ?
संस्कृतभाषा आपली राष्ट्रभाषा होण्यास का योग्य आहे ?

iv) While drafting the constitution, which smritis did Dr. Ambedkar studied ?
घटनेचा मसुदा तयार करताना डॉ. आंबेडकरांनी कोणत्या स्मृतिग्रंथांचा अभ्यास केला ?

**Q.7 Complete the following passage using the words from the brackets :** **5**

**कंसात दिलेल्या शब्दांनी रिकाम्या जागा भरून परिच्छेद पूर्ण करा :**

अस्ति हेमाङ्गदे देशे राजपुरं नाम -- । तत्र जीवंधरो नाम कोऽपि -- राजपुत्रोऽभवत् । एकदा प्रवृत्ते मधुमासे जीवंधरकुमार: -- सह जलक्रीडां कर्तुं नदीं गत: । तत्र आसन्नमरण: कोऽपि -- तस्य दृष्टिमागत:।

केनापि -- भृशं ताडित: स: रुधिराप्लावित: तत्र पतित: करूणम् आक्रोशति स्म ।

(शब्दमञ्जूषा - कुक्कुर:, नगरम्, निर्दयेन, वयस्यै:, दयाशीलो)

*OR*

**Rewrite any five of the following sentences using appropriate forms of the words in the brackets :**

**खालीलपैकी कोणत्याही पाच अव्यय । उपपद विभक्तींचा संस्कृत वाक्यरचनेत उपयोग करा.**

सह, विना, वि + तृ, नम:, अग्रे, बहि:, भयम्, दा

**Q.8 Solve any five of the following sub-questions.** **15**

**खालीलपैकी कोणतेही पाच उपप्रश्न सोडवा.**

**A) Recognise any three forms of the following :**

**खालीलपैकी कोणतीही तीन रूपे ओळखा :**

१. आदिष्ट: २. जगाम ३. श्रुणु ४. गत्वा ५. सर्वेषाम्

**B) Dissolve and name any three of the following compounds in Sanskrit.**

**खालीलपैकी कोणत्याही तीन समासांचा विग्रह करून त्यांची नावे संस्कृतात लिहा.**

१. अनभिज्ञ: २. यथाशक्ति ३. महोदय: ४. सूर्यप्रकाश: ५. महावृक्षा:

**C) Dissolve any three of the following संधी's :**

**कोणतेही तीन संधी सोडवा :**

१. भूपतिर्विजयते २. तत्रासीदेक: ३. विद्यालयेष्वपि ४. दीनतरोऽदृश्यत

५. रात्रिमयापयत्

**D) Give any three Sanskrit antonyms :**

**कोणत्याही तीन शब्दांचे संस्कृत विरूद्धार्थी शब्द लिहा.**

१. मोद: २. बुधा: ३. दूरत: ४. पर्याप्त: ५. शीतम्

**E) Complete and rewirte any three of the following sentences using the correct alternatives given in the brackets.**

**कोणतीही तीन वाक्ये कंसातील योग्य पर्याय निवडून पुन्हा लिहा :**

1) नरेन्द्रस्य ____________ मूर्ति: पतिता ।

(हस्तम् / हस्तात् / हस्तेन)

2) सः अकथयत् मम चीवराणि ______ ।

(जीर्णः / जीर्णा / जीर्णानि)

3) एतेषु ______ वैद्येषु नावधानं ददतीति ।

(षड्भिः / षट्सु / षड्)

4) ______ जैविकतैलं निर्मीयते ।

(गोमयात् / अवकरात् / एरण्डबीजात्)

5) धनस्य हस्तान्तरमनेन तन्त्रज्ञानेन कर्तुं शक्नुमः ______ ।

(अहं / आवां / वयम् )

**F) Transform any three of the following sentences as directed in bracket :**

**सूचनांप्रमाणे बदल करून खालीलपैकी कोणतीही तीन वाक्ये पुन्हा लिहा.**

1) मग्ना + अस्ति । (Make सन्धि)

सन्धि करा.

2) भवान् प्रभाते पद्भ्यामागच्छतु ।

(Use 'त्वम्' in place of 'भवान्')

('भवान्' ऐवजी 'त्वम्' वापरा.)

3) विद्युत्प्रवाहे खण्डिते एतादृशी चर्चा प्रारब्धा ।

(Remove absolute locative)

(सति सप्तमी काढा)

4) रवीन्द्रनाथेन सः निमन्त्रितः ।

Change the voice)

(प्रयोग बदला)

5) पाठ्यपुस्तके ______ गद्यपाठाः सन्ति ।

(Use appropriate from of 7)

(7 या संख्यावाचकाचे रूप वापरा.)

6) अश्वयानं मार्गे वेगेन धावति ।

(Make it plural)

(वाक्य बहुवचनी करा.)

***

# निवेदन

शिक्षण संक्रमणच्या ऑक्टो. १३ च्या अंकात संस्कृत संपूर्ण या विषयाच्या इ. १० वी च्या प्रश्नपत्रिकेत प्र. क्र. ७ मधील विकल्पाचे इंग्रजी भाषांतर वेगळे झाले आहे. कृपया त्यात खाली दर्शविल्याप्रमाणे दुरुस्ती आहे याची कृपया सर्वांनी नोंद घ्यावी, ही विनंती.

| पृष्ठ क्र. | प्रश्न क्र. | मुद्रित मजकूर | सुधारित मजकूर |
|---|---|---|---|
| ४६ | ७ | Rewrite any five of the following sentences using appropriate forms of the words in the brackets. | Write any five sentences using appropriate forms of the verbs and indeclinables |

## संस्कृत मन्दाकिनी (इयत्ता १० वी) निवेदन

ऑक्टोबर २०१३ च्या शिक्षण संक्रमणमध्ये प्रकाशित झालेल्या नमुना प्रश्नपत्रिकेसंदर्भात

- पाठ्यपुस्तकातील प्रश्नपत्रिका आराखडा प्रश्न क्रमांक ३ मध्ये निबंधाला माध्यम भाषेतील वाक्यांचे संस्कृतमध्ये भाषांतर करा, या पर्यायाऐवजी शिक्षण संक्रमण एप्रिल २०१३ मध्ये दिलेला पाच रिकाम्या जागा भरून संस्कृतमधील कथा/परिच्छेद पूर्ण करा, हा पर्याय घ्यावा. विशिष्ट विषयासंबंधी संस्कृत लेखन हे समान सूत्र यात दिसून येत असल्यामुळे हा बदल करीत आहोत.
- पाठ्यपुस्तकातील प्रश्नपत्रिका आराखडा प्रश्न क्रमांक ३ चा पर्याय माध्यम भाषेतील वाक्यांचे संस्कृतमध्ये भाषांतर करा. हा प्रश्नपत्रिकेत प्रश्न क्रमांक ७ मधील कथेच्या ऐवजी समाविष्ट केला आहे.
- शिक्षण संक्रमण एप्रिल २०१३ मध्ये प्रश्न क्रमांक ८ मध्ये 'इ' जोड्या जुळवा, हा प्रश्न अनावधानाने समाविष्ट केला गेला आहे.

  आठवा प्रश्न हा व्याकरणावर आधारित आहे. जोड्या जुळवा हा प्रश्न व्याकरणावर आधारित नसल्याने त्याचा विचार प्रश्न क्रमांक ८ मध्ये करणे अनुचित ठरते.

  मात्र, प्राश्निक समासांमध्ये समानार्थी/विरूद्धार्थी शब्द यांच्यामध्ये जोड्या जुळवा, या प्रकारचा प्रश्न विचारू शकतात.
- शिक्षण संक्रमण ऑक्टोबर २०१३ च्या अंकातील नमुना प्रश्नपत्रिकेत प्रश्न क्रमांक ४ मध्ये संस्कृत वाक्यांचे घटना क्रमानुसार फेर मांडणी यामध्ये गद्य/पद्यातील गोष्ट प्राश्निकाच्या मर्जीनुसार अपेक्षित आहे. या ठिकाणी ती गद्य पाठातून घेतलेली आहे.

  त्याला पर्याय असलेल्या प्रश्नात सात उपप्रश्न दिलेले आहेत. त्या ऐवजी ते आठ असायला हवेत. **विचारलेले सातही प्रश्न गद्यावर आधारित आहेत. ते गद्य पद्यावर आधारित असायला हवे होते.** अनावधानाने झालेल्या चुकीबद्दल मनापासून दिलगिरी व्यक्त करीत आहोत.
- प्रश्न क्रमांक ८ 'ग' सूचनेप्रमाणे बदल करा. यामध्ये पाठ्यपुस्तकात दिलेल्या सहा पर्यायांपैकी कोणतेही पाचच पर्याय अपेक्षित आहेत. नमुना प्रश्नपत्रिकेत पाच ऐवजी सहा पर्याय दिले गेले आहेत.

  सर्व मुख्याध्यापकांनी आणि संबंधित विषय शिक्षकांनी कृपया याची नोंद घ्यावी.